23.09.20
3

गतश्च भवति। यथोदाहरणं रात्रिदिवसयोः निर्धारणं सूर्यदर्शनादेव सञ्जायते। यथा– 'दिनं दिनेशस्य यतोऽत्र दर्शने तमी तमो हन्तुरदर्शने सति'। कुत्रचिद् रात्रिः भवति तर्हि कुत्रचिद् दिवा एवं सूर्यप्रभावेनैव भूमण्डलोपरि विविधऋतुपरिवर्तनं शैत्यम्, उष्णत्वं चोपकल्प्यते। सूर्यस्योदयानन्तरं पङ्कजस्योदयः, कमलिनेः पुटकत्वं चोपपद्यते। यथा प्राप्यते उत्तररामचरिते– "विकसति हि पतङ्गस्योदये पुण्डरीकः, द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः"। वनस्पतिषु यादृक् प्रभावो दृश्यते स नूनं सूर्यचन्द्रमसोः चमत्कारः एव। भगवता कृष्णेन गीतायाम् उक्तम्– ओषधिः सोमप्रभावात् रसात्मको भवति। बहवः वृक्षपुष्पलताः ये सूर्येण प्रभाविताः बहवः एतादृशाः ये रात्रौ चन्द्रोदयात् प्रभाविताः भवन्ति। अनुभूयते जगति सन्दृश्यते च यथा रात्रौ वनस्पतिषु विकासो भवति न तथा दिवायाम्।


डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० म०उ०वि०सुखसेना,
पूर्णियाँ।

## चन्द्रग्रहणविचार: ——

चन्द्रस्य ग्रहणं चन्द्रग्रहणम् इति । एवमत्र ग्रहणे ग्राह्य-ग्राहकयोर्योगोऽवश्यम्भावी । अत्र ग्राहको भूमेः छाया स्वच्छ चन्द्रो ग्राह्यः भवति ।

वस्तुतस्तु चन्द्रादिग्रहेषु स्वगतप्रकाशाभावाद् रविकिरणसंयोगवशादेव प्रकाशत्वाच्च चन्द्रबिम्बे यावति प्रदेशे रविकिरणा लगन्ति, तावान् भागः उज्ज्वलः इतरो भागः तमोरूपः । रवेः सर्वतः प्रसरणशील-किरणाः सूर्याल्पमानकेन भूबिम्बेनावरुद्धा आकाशे तमोमयी सूचीमुत्पादयन्ति स तमोरूपः राहुः । सा सूची दीर्घतया चन्द्रकक्षातोऽपि दूरं याति परञ्च रवेः क्रान्तिवृत्ते भ्रमणात् तत्सुमुखी सूची चन्द्रकक्षास्थक्रान्तिवृत्तधरातल-सन्लग्ना भवति । तत्र स्वकक्षास्थविमण्डलगतश्चन्द्रः स्व-गत्या भ्रमन् यदा तां भूभारूपसूच्यां प्रविशति तदा चन्द्रबिम्बे रविकिरणसंयोगाभावात् प्रकाशाभावः, तदेव चन्द्रग्रहणम् । यथोक्तं भास्करेण —

भानोर्बिम्बपृथुत्वात् पृथुपृथिव्याः प्रभा हि सूच्यग्रा ।
दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता ।

चन्द्रग्रहणं कदा भवति इति प्रसङ्गः सूर्यसिद्धान्ते प्राप्यते-

भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा ।
शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके ॥

अत्रोक्तमस्ति सूर्यतः षड्राश्यभ्यन्तरे पृथ्वीच्छाया भ्रमति, तत्र महीच्छाया समे वा सूर्यसमं चन्द्रपाते सति ग्रहणं वा भूभातो रवितो वा कियद्भिरंशैरूनोऽधिको वा यदा चन्द्रपातो भवति तदा ग्रहणमिति ।

23.09.20
2

ग्रहाणां मानवजीवने प्रभावः —

'यत् पिण्डे तद् ब्रह्माण्डे' इति सिद्धान्तेन न खलु दार्शनिकपक्षाणामेव सिद्धिर्भवति अपितु ज्योतिर्पिण्डानां ब्रह्माण्डान्तर्गतानां प्रभावानामपि सिद्धिर्भवति। केनापि सत्यमुक्तं यत् — 'ग्रहैरधिष्ठितमिदं सर्वं त्रैलोक्यं सचराचरम्'। खस्थानां पिण्डानां भूस्थितजनैः सह सम्बन्धः सहसा न प्रतीतिमायाति परं तयोरविच्छिन्नः सम्बन्धोऽस्त्येव यथार्थतः शास्त्रप्रमाणात्।

गृह्णाति गतिविशेषानिति यद्वा गृह्णाति फलदातृत्वेन जीवानित्यर्थे 'विभाषा-ग्रहः' इति पाणिनीयसूत्रेणाच् प्रत्यये सति सिद्ध्यति ग्रहशब्दः। यथा — पाणिनीय अष्टाध्यायी 3।1।143, एवमेव आचार्यपराशरेणापि "यः गतिमान् स ग्रहः इत्युक्तम्"। यथा — विपुलाकारवन्तोऽन्ये गतिमन्तो ग्रहाः किल।

सर्वेषु ग्रहेषु सूर्यः प्रधानमेव। यः ग्रहराजसंज्ञया प्रतिपठीयते। यतः तद् रश्मिप्रभावेण सर्वेऽपि ग्रहाः प्रकाशिता भवन्ति इति आर्यभट्टोक्तिः। यथा —

भूर्ग्रहभानां गोलार्धानि स्वच्छायया विवर्णानि।
अर्धानि यथासारं सूर्याभिमुखानि दीप्यन्ते॥

एवम् आकाशस्थसमस्तज्योतिर्पिण्डानां प्रभावः अशेषचराचराणामुपरि स्वाभाविकः एव। यद्यपि स्थिरवस्तुनः प्रभावम् अल्पक्षेत्रे, वस्तुविशेषे वा पतति परन्तु गतिमान् वस्तुनः प्रभावः सार्वदेशिकः समष्टि —

P.T.O